## संस्कृतवार्ता:

दिनाङ्क :-05.04.2025 प्रात: - 06:55

### अथ वार्ताः

**प्रधानमंत्री श्रीलंका यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य श्रीलङ्कादेशस्य कोलंबोनगरे राष्ट्रपतिना अनुराकुमारदिसानायके इत्यनेन सह द्विपक्षीयसम्बन्धान् सुदृढं कर्तुं अपि च ऊर्जा, व्यापार, संपर्क, रक्षा चेत्येतेषु क्षेत्रेषु विस्तृतां चर्चां करिष्यति। श्रीमोदी द्वीपराष्ट्राणां त्रिदिवसीयराजकीय-यात्रायां गतसायं श्रीलङ्कादेशस्य राजधानीम् संप्राप्तवान्। प्रधानमन्त्रिणः मोदिनः कोलम्बोनगरे भव्यं स्वागतं अभवत्, राष्ट्रपतिना दिसानायके इत्यनेन सह तस्य मन्त्रिमण्डलस्य शीर्षमन्त्रिणः, भण्डारनायके अन्ताराष्ट्रियविमानस्थानके तस्य स्वागतं कृतवन्तः। गतवर्षस्य सितम्बरमासे राष्ट्रपतिदिसानायके-इत्यस्य कार्यभारग्रहणानन्तरं कस्यापि देशस्य शासनाध्यक्षरूपेण श्रीमोदिनः श्रीलङ्कादेशस्य प्रथमा यात्रा अस्ति। इतः परं किञ्चित्कालानन्तरं तस्य औपचारिकं स्वागतं भविष्यति। प्रधानमन्त्री मोदी थाईलैण्डदेशस्य द्विदिवसीययात्रायाः समापनानन्तरं श्रीलङ्कादेशम् संप्राप्तवान्। इत: पूर्वं सः बैंकॉक्-नगरे बिम्स्टेक शिखरसम्मेलने भागं गृहीतवान्।

**प्रधानमंत्री थाईलैंड**

प्रधानमन्त्रिणा मोदिना बिम्स्टेक इत्यस्मिन् संस्था-क्षमतानिर्माणयोः भारतस्य नेतृत्वे नैके उपक्रमाः घोषिताः। ह्यः बैंकॉक्-नगरे षष्ठे बिम्स्टेक्-शिखरसम्मेलने भागं गृहीत्वा प्रधानमन्त्रिणा सहकार्यस्य विभिन्नपक्षाणां एकविंशति-बिन्दुयुता कार्ययोजना प्रस्ताविता। कार्ययोजना व्यावसायिक-सम्बन्धं सुदृढं कर्तुं, सूचनाप्रौद्योगिकीक्षेत्रस्य क्षमतां संवर्धयितुं, आपदाप्रबन्धने सहकार्यं कर्तुं च केन्द्रीक्रियते, मुख्यतया म्यांमार-थाईलैण्ड्-देशयोः सद्यः एव भूकम्पस्य आलोके। प्रधानमन्त्रिणा यूनां कुशलीकरणाय नूतनं कार्यक्रमं BODHI इति घोषितम्। BODHI इत्यस्य अर्थः बिमस्टेक मानवसंसाधनमूलसंरचनायाः संघठितविकास: इति भवति । अस्मिन् प्रशिक्षणे व्यावसायिकानां, छात्राणां, शोधकर्तृणां, कूटनीतिज्ञादीनां कृते छात्रवृत्तिप्रदत्ता भविष्यति।

**प्रधानमन्त्रिणा - बिम्स्टेक-सम्मेलन**

प्रधानमन्त्रिणा मोदिना ह्यः थाईलैण्ड्देशे बिम्स्टेक-सम्मेलनावधौ द्विपक्षीयसमागमस्य श्रृङ्खला अपि आयोजिता। बाङ्गलादेशस्य प्रमुखपरामर्शदेन मुहम्मद युनुस् इत्यनेन सह मिलित्वा प्रधानमन्त्री बाङ्गलादेशे शान्तिं स्थिरतां समावेशं लोकतन्त्रं च स्थापयितुं इति भारतस्य समर्थनं पुनः उक्तवान्। नेपालस्य स्वसमकक्षेन

केपी शर्मा ओली इत्यनेन सह मेलने प्रधानमन्त्री मोदी अवदत् यत्, भारतं नेपालेन सह सम्बन्धान् इतोप्यधिकं प्राथमिकतां प्रददाति।

**ओम बिरला इपु ताशकन्द**

लोकसभाध्यक्षः ओमबिरला: अन्तासंसदीयसङ्घस्य सार्धैकशततमाया: विधानसभायाः संसदीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति, यद्धि अद्यारभ्य उज्बेकिस्तानस्य ताशकन्द नगरे आरभते। श्रीबिरला सामाजिकविकासाय न्यायाय च संसदीयकार्याणि इति विषये सामान्यविमर्शस्य उच्चस्तरीयखण्डस्य समये सभां सम्बोधयिष्यति। प्रतिनिधिमण्डले राज्यसभा उपाध्यक्षः हरिवंशः, भर्तृहरि महताबः, अनुरागसिंह ठाकुरः, डॉ. सास्मितपात्रा, अशोककुमारमित्तलः, किरणचौधरी, लता वानखेडे च सन्ति।

**वैष्णव-तमिलनाडु:**

केन्द्रीयरेलमन्त्री अश्विनीवैष्णवः अद्यारभ्य तमिलनाडुराज्यस्य द्विदिवसीययात्रायां भविष्यति। स्वभ्रमणकाले श्रीवैष्णवः आत्याधुनिक-पम्बनरेल-सेतोः उद्घाटनस्य अन्तिमसज्जतायाः च निरीक्षणार्थं रामेश्वरं प्रति गमिष्यति। भारतस्य प्रथमः ऊर्ध्वाधर-समुद्रसेतुं नूतन-पम्बन-रेल-सेतुं उद्घाटयितुं प्रधानमन्त्री नरेन्द्रमोदी अपि श्वः राज्यस्य यात्रायां भविष्यति।

**आई.पी.एल्.स्पर्धा**

आई.पी.एल्. इत्येतस्यां स्पर्धामालिकायाम् गतसायं लखनऊ-सुपर-जायंट्स इत्यनेन दलेन मुम्बईइंडियन्स-दलं द्वादशधावनांकै: पराजितम्।

।।इति वार्ता:।।